श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ अष्टमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टमः सर्गः ॥

## प्रहस्तदुर्मुखवज्रदंष्ट्रनिकुम्भवज्रहनुभी रावणस्य समक्षं शत्रुसेनां निपातयितुं स्वोत्साहस्य प्रदर्शनम्

ततो नीलाम्बुदप्रख्यः प्रहस्तो नाम राक्षसः।
अब्रवीत् प्राञ्जलिर्वाक्यं शूरः सेनापतिस्तदा॥ **6.8.1** ॥

देवदानवगन्धर्वाः पिशाचपतगोरगाः।
सर्वे धर्षयितुं शक्याः किं पुनर्मानवौ रणे॥ **6.8.2** ॥

सर्वे प्रमत्ता विश्वस्ता वञ्चिताः स्म हनूमता।
नहि मे जीवतो गच्छेज्जीवन् स वनगोचरः॥ **6.8.3** ॥

सर्वां सागरपर्यन्तां सशैलवनकाननाम्।
करोम्यवानरां भूमिमाज्ञापयतु मां भवान्॥ **6.8.4** ॥

रक्षां चैव विधास्यामि वानराद् रजनीचर।
नागमिष्यति ते दुःखं किञ्चिदात्मापराधजम्॥ **6.8.5** ॥

अब्रवीत् तु सुसङ्क्रुद्धो दुर्मुखो नाम राक्षसः।
इदं न क्षमणीयं हि सर्वेषां नः प्रधर्षणम्॥ **6.8.6** ॥

अयं परिभवो भूयः पुरस्यान्तःपुरस्य च।
श्रीमतो राक्षसेन्द्रस्य वानरेण प्रधर्षणम्॥ **6.8.7** ॥

अस्मिन् मुहूर्ते गत्वैको निवर्तिष्यामि वानरान्।
प्रविष्टान् सागरं भीममम्बरं वा रसातलम्॥ **6.8.8** ॥

ततोऽब्रवीत् सुसङ्क्रुद्धो वज्रदंष्ट्रो महाबलः।
प्रगृह्य परिघं घोरं मांसशोणितरूषितम्॥ **6.8.9** ॥

किं नो हनूमता कार्यं कृपणेन तपस्विना।
रामे तिष्ठति दुर्धर्षे सुग्रीवेऽपि सलक्ष्मणे॥ **6.8.10** ॥

अद्य रामं ससुग्रीवं परिघेण सलक्ष्मणम्।
आगमिष्यामि हत्वैको विक्षोभ्य हरिवाहिनीम्॥ **6.8.11** ॥

इदं ममापरं वाक्यं शृणु राजन् यदिच्छसि।
उपायकुशलो ह्येव जयेच्छत्रूनतन्द्रितः॥ **6.8.12** ॥

कामरूपधराः शूराः सुभीमा भीमदर्शनाः।
राक्षसा वा सहस्राणि राक्षसाधिप निश्चिताः॥ **6.8.13** ॥

काकुत्स्थमुपसङ्गम्य बिभ्रतो मानुषं वपुः।
सर्वे ह्यसम्भ्रमा भूत्वा ब्रुवन्तु रघुसत्तमम्॥ **6.8.14** ॥

प्रेषिता भरतेनैव भ्रात्रा तव यवीयसा।
स हि सेनां समुत्थाप्य क्षिप्रमेवोपयास्यति॥ **6.8.15** ॥

ततो वयमितस्तूर्णं शूलशक्तिगदाधराः।
चापबाणासिहस्ताश्च त्वरितास्तत्र यामहे॥ **6.8.16** ॥

आकाशे गणशः स्थित्वा हत्वा तां हरिवाहिनीम्।
अश्मशस्त्रमहावृष्ट्या प्रापयाम यमक्षयम्॥ **6.8.17** ॥

एवं चेदुपसर्पेतामनयं रामलक्ष्मणौ।
अवश्यमपनीतेन जहतामेव जीवितम्॥ **6.8.18** ॥

कौम्भकर्णिस्ततो वीरो निकुम्भो नाम वीर्यवान्।
अब्रवीत् परमक्रुद्धो रावणं लोकरावणम्॥ **6.8.19**॥

सर्वे भवन्तस्तिष्ठन्तु महाराजेन सङ्गताः।
अहमेको हनिष्यामि राघवं सहलक्ष्मणम्॥ **6.8.20**॥

सुग्रीवं सहनूमन्तं सर्वांश्चैवात्र वानरान्।
ततो वज्रहनुर्नाम राक्षसः पर्वतोपमः॥ **6.8.21**॥

क्रुद्धः परिलिहन् सृक्कां जिह्वया वाक्यमब्रवीत्।
स्वैरं कुर्वन्तु कार्याणि भवन्तो विगतज्वराः॥ **6.8.22**॥

एकोऽहं भक्षयिष्यामि तां सर्वां हरिवाहिनीम्।
स्वस्थाः क्रीडन्तु निश्चिन्ताः पिबन्तु मधु वारुणीम्॥ **6.8.23**॥

अहमेको वधिष्यामि सुग्रीवं सहलक्ष्मणम्।
साङ्गदं च हनूमन्तं सर्वांश्चैवात्र वानरान्॥ **6.8.24**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टमः सर्गः॥